**तिक** पु० तिक—क । ऋषिभेदे । तस्य गोत्रापत्यम् तिका० फिञ् । तैकायनि तद्गोत्रापत्ये पुंस्त्री० । तस्य तिककितवादित्वात् द्वन्द्वे गोत्रप्रत्ययस्य लुक् बहुत्वार्थे । तिककितवाः तिककितवयोर्गोत्रापत्येषु । उत्करा० चतुरर्थ्यां छ । तिकीय तत्सन्निकृष्टदेशादौ त्रि० ।

**तिककितवादि** पु० "तिककितवादिभ्यो द्वन्द्वे" पा० उक्ते द्वन्द्वे बहुत्वे गोत्रप्रत्ययलुग्निमित्ते शब्दगणे । स च गणः पा०गणसू०उक्तो यथा "तिककितवा वङ्खरभण्डीरथाः । उपकलमकाः । पफकनरकाः वकनखगुदपरिणद्धाः उज्जककुभाः लङ्कशान्तमुखाः उत्तरशलङ्कटा कृष्णाजिनकृष्णसुन्दराः भ्रष्टककपिष्ठलाः अग्निवेशदशेरुकाः" ।

**तिकादि** पु० गोत्रे फिञ् प्रत्ययनिमित्ते शब्दसमूहे स च गणः पा०ग०सू०उक्तो यथा "तिक, कित, संज्ञा, बाला, शिखा, उरस्, शाठ्य, सैन्धव, यमुना, रूप्य, ग्राम्य, नील, अमित्र, गौकक्ष्य, कुरु, देवरथ, तैतल, औरस, कौरव्य, भौरिकि, भौलिकि, चौपयत, चैटयत, शीकयत, चैतयत, धाजवत, चन्द्रमस्, शुभ, गङ्गा, वरेण्य, सुपामन्, आरद्ध, वह्यका, खल्यका, वृष, लोमक, उदन्य, यज्ञ" । "तिकादिभ्यः फिञ्" पा०उक्ते "तिक इत्येवमादिभ्योऽपत्येऽर्थे फिञ् स्यात् तैकायनिः कैतवायनिः ।

**तिक्त** पु० तेजयति तिज—बा० कर्त्तरि क्त । रसभेदे (तेत) अमरः । २पर्पटकौषधौ न० हेमच० । ३सुगन्धे मेदि० । ४कुटजवृक्षे पु० शब्दच० । ५वरुणवृक्षे शब्दमाला । एतेषां तिक्तरसाधिक्यात्तथात्वम् । ६तिक्तरसयुक्ते अमरः । "षड्विधस्तु रसस्तत्र" भाषोक्तेर्यद्यपि तिक्तस्य पार्थिवगुणत्वं तथापि वायोरुपष्टम्भवशादेव पार्थिवे तिक्तरसस्य सम्भवः तदेतत् सुश्रुते व्यक्तं यथा "आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः तस्मादाप्यो रसः परस्परसंसर्गात्परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षात्तु ग्रहणम् । स खल्वाप्यो रसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते । तद्यथा । मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति । ते च भूयःपरस्परसंसर्गात्त्रिषष्टिधा भिद्यन्ते । तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः । भूम्यग्निगुणबाहुल्यादम्लः । तोयाग्निगुणबाहुल्याल्लवणः । वाय्वग्निगुणबाहुल्यात्कटुकः वाय्वाकाशगुणबाहुल्यात्तिक्तः । पृथिव्यनिलगुणबाहुल्यात्कषाय इति । तत्र मधुराम्ललवणा वातघ्नाः । मधुरतिक्तकषायाः पित्तघ्नाः । कटुतिक्तकषायाः श्लेष्मघ्नाः । तत्र वायुरात्मनैवात्मा पित्तमाग्नेयं श्लेष्मा सौम्य इति त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च । केचिदाहुरग्नीषोमीयत्वाज्जगतो रसा द्विविधाः सौम्या आग्नेयाश्च तत्र मधुरतिक्तकषायाः सौम्याः । कट्वम्ललवणा आग्नेयाः । मधुराम्ललवणाः स्निग्धा गुरवश्च । कटुतिक्तकषाया रूक्षा लघवश्च । सौम्याः शीता आग्नेयाश्चोष्णाः" ।

"सूक्ष्मरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमीषत्तिक्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति" ।

तिक्तरसलक्षणं तत्रोक्तं यथा "यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः । "तिक्तः शीतस्तृषामूर्च्छाज्वरपित्तकफान् जयेत् । रुच्यः स्वयमरोचिष्णुः कण्ठस्तन्यास्यशोधनः । वातलोऽग्निकरो नासाशोषणो रूक्षणो लघुः" । रुच्यः अन्येषु वस्तुषु रुचिमुत्पादयति । स्वयमरोचिष्णुः यथा निम्बः स्वयन्न रोचते । अन्येषु रुचिं करोति (अतियुक्तस्य तिक्तस्य गुणाः) सोऽतियुक्तः शिरः शूलमन्यास्तम्भश्रमार्त्तिकृत् । कम्पमूर्च्छातृषाकारी बलशुक्रक्षयप्रदः" भावप्र० "तिक्तः पित्तकफच्छेदी विषकुष्ठज्वरापहः । दीपनः पाचनो रूक्षः कण्डूकृमिहरो लघुः" आह्निकत०। "पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस !" नैष० सुगन्धे ।"नादातुमन्यकरिमुक्तमदाम्बुतिक्तम्" रघुः तिक्तं सुरभि "कटुतिक्तकषायास्तु सौरभेऽपि प्रकीर्तिताः" केशवः मल्लि० "चूताङ्कुरस्वादकषायकण्ठः" मधुरकण्ठ इत्यर्थः। "तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः" मेघ० ।"तिक्तैः सुगन्धिभिस्तिक्तरसवद्भिश्च" मल्लि० । "तोयक्रीडानिरतयुवती स्नानतिक्तैर्मरुद्भिः" मेघ० ।

**तिक्तक** पु०तिक्त+संज्ञायां कन् ।१पटोले अमरः २चिरतिक्ते (चिराता) शब्दर० । ३कृष्णखदिरे शब्दमा० । ४इङ्गुदीवृक्षे भावप्र० । एतेषां तिक्तरसत्वात्तथात्वम् स्वार्थे क । तिक्तरसे पु०तद्वति त्रि०स्त्रियां कापि अत इत्त्वम् तिक्तिका

**तिक्तकन्दिका** स्त्री तिक्तः कन्दोऽस्याः कप् कापि अत इत्त्वम् । गन्धपत्रायां राजनि० । [शब्दार्थचि० ।

**तिक्तका** स्त्री तिक्तेन रसेन कायति कै—क । कटुतुम्ब्यां ।

**तिक्तगन्धिका** स्त्री तिक्तो गन्धो लेशोऽपि यस्याः । वराह-